International Journal of Sanskrit Research 2019; 5(2): 101-102

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(2): 101-102
© 2019 IJSR
www.anantaajournal.com
Received: 22-01-2019
Accepted: 24-02-2019

**तिवारी जय गणेश प्रसाद**
शोध छात्र: ऋग्वेद विभागः
श्री वेंकटेश्वर वेद विश्वविद्यालय:
आन्ध्रप्रदेश, भारत

**Correspondence**
**तिवारी जय गणेश प्रसाद**
शोध छात्र: ऋग्वेद विभागः
श्री वेंकटेश्वर वेद विश्वविद्यालय:
आन्ध्रप्रदेश, भारत

# उपलेखसूत्र परिचयः, तस्मिन् अपदक्रमऋचाम् निर्णयश्च

**तिवारी जय गणेश प्रसाद**

**प्रस्तावना**

श्लोकः - साक्षान्मूल प्रमाणाय विष्णोरमिततेजसे ।
आद्याय सर्व वेदनां ऋग्वेदाय नमोनमः ।।

**उपलेखसूत्र परिचय**

साक्षात् भगवत्या पार्वत्या ऋग्वेदस्य क्रमपाठ रक्षणाय, क्रमपाठस्य विषयाणाम् बोधनाय च उपलेखसूत्राख्य ग्रन्थः प्राणायि। अस्मिन् एव उपलेखग्रन्थे अन्तिमे एवम् तस्य प्रमाणम् लभ्यते।

श्लोकः - क्रममिममुमयाभिगीतम् द्विज गुरुणादरेण पठितम्।
पठितापि पुण्यकर्मा भवति शास्त्रमुपलेखम् शास्त्रमुपलेखम् ।। इति

अयम् उपलेखग्रंथ: अष्ट वर्गात्मक: दृश्यते। तत्रादौ प्रथमे वर्गे संज्ञा परिभाषा, क्रमपाठस्य सामान्य नियमः, नित्य अवसानीयानां गणना।

द्वितीये "न्याविध्यदिलीबिशस्य" इत्याराभ्य "निरुस्वासारमस्कृतोषसमिति तु रात्राम् पंचक्रमः" पर्यन्तम् अष्टविंशती विशेष अनवसानीयानां एकत्री कृत्य अन्यत्रालभ्य रित्या निपात रूपेण गणना।

तृतीये, वेष्टन लक्षणम्, वेष्टनीयानि पदानि, वेष्टन निमित्तम्।

चतुर्थ, पंचमे, वेष्टन कथन प्रकारः।

षष्ठे सप्तमे, वेष्टने इतिकरणेन (उदत्तादि) स्वर, वर्णानाम् सन्धि:, येन अध्येतुः लेशतोपि संदेहः न भवति।

अन्तिमे अष्टमे वर्गे, वेष्टनकाले (उदत्तादि) स्वर सन्धौ कम्प विषयाः, अन्यत्रालभ्य नवकम्प लोप, अपदक्रम विषय:, उपलेखस्य अवतरणम्, दृश्यते।

**अपदक्रम ऋचा:।**

श्लोकः- शिक्षाच्छन्दोव्याकरणैः
यत्सामान्येनोक्तलक्षणम् ।
तदेवमिहशाखायामिति शास्त्रप्रयोजनम् ।।

इत्यभियुक्तोक्तरीत्या प्रातिशाख्यस्य अनुवादकत्वं प्रतीयते तथापि शिक्षादौ अनुक्तानां क्रमप्लुति स्वरभक्तीनां प्रतिपादनेन ऋक्प्रातिशाख्यस्य स्वतन्त्र ग्रन्थता अस्ति । अस्मिन् उपलेखे प्रातिशाख्यादि ग्रन्थे अनुक्तानि अत्यन्तम् प्रधान विषयाः दृश्यन्ते, तेषु अन्यतमः, अन्यत्रालभ्य: अयम् अंशः।

सूत्रम् - "त्र्यंम्बकं भद्रंनः प्रजापते ऋतं च सत्यं चेत्यपदक्रमम्"

1) त्र्यंम्बकं, 2) भद्रंनः 3) प्रजापते 4) ऋतं च सत्यं एतेषाम् पद पाठः, क्रमपाठः न भवति इति सूत्रार्थ:। उपलेख: प्रधानतः क्रमपाठ संरक्षणाय आविर्भूत:, तस्मात् अत्र क्रमपाठ: न भवति इति उक्तं। संशय: भवितुं अर्हति केवलं क्रमपाठ: पद पाठः न भवति, जटादि पाठः भवति वा इति! यस्य मन्त्रस्य पदपाठम् न भवति तस्य क्रमपाठम् आरभ्य सर्वेषाम् विकृति पाठे केवलम् संहितावत् उच्चारणम्, यतोहि जटापाठम् आश्रित्य अवशिष्ट विकृति पाठा: (माला, दण्ड, रेखा, रथ, ध्वज, शिखा, घना:) भवन्ति, जटा पाठः क्रमपाठम् आश्रित्य भवति। अस्य प्रमाणं व्याळिशिक्षायाम् एवं दृश्यते।

श्लोकः - जटा माला दण्ड रेखा रथ ध्वज शिखा घना:।
क्रममाश्रित्य निरवृत्ता: विकाराः अष्ट विश्रुता:।।

एकम् उदाहरणम् पश्याम: -

संहितापाठः

प्रजापते न त्वदेतान्यन्यो विश्वा जातनि परि ता बभूव।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयोरयीणाम्॥ (ऋग्वेदे ८,७,१०)

अयम् मन्त्रः पद पाठे, क्रमपाठे अपि एवम् एव भवति। द्वाभ्यां पदाभ्या**म्** क्रमः न भवति, यतोहि अस्य पद पाठः अपि नास्ति।

इत्येवम् बहुतरविषयप्रतिपादकोयं उपलेख: अध्येतृणाम् कल्पतरु:, सर्वे आसेव्य इति अस्य (उपलेखस्य) ग्रन्थ कर्त्रीम् परमेश्वरीम् संप्रार्थ्य, शम्।